# श्रीगायत्रीसहस्त्रनामस्तोत्रम्

## ध्यानम्

रक्तश्वेतहिरण्यनीलधवलैर्युक्तां त्रिनेत्रेज्ज्वलां
रक्तारक्तनवस्त्रजं मणिगणैर्युक्तां कुमारीमिमाम् ।
गायत्री कमलासनां करतलव्यानद्धकुण्डाम्बुजां
पद्माक्षीं च वरस्त्रजञ्च दधतीं हंसाधिरूढां भजे ॥

**नारद उवाच -**

भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
श्रुतिस्मृतिपुराणानां रहस्यं त्वन्मुखाच्छ्रुतम् ॥१॥
सर्वपापहरं देव येन विद्या प्रवर्तते ।
केन वा ब्रह्मविज्ञानं किं नु वा मोक्षसाधनम् ॥२॥
ब्राह्मणानां गतिः केन केन वा मृत्यु नाशनम् ।
ऐहिकामुष्मिकफलं केन वा पद्मलोचन ॥३॥
वक्तुमर्हस्यशेषेण सर्वे निखिलमादितः ।

**श्रीनारायण उवाच -**

साधु साधु महाप्राज्ञ सम्यक् पृष्टं त्वयाऽनघ ॥४॥
शृणु वक्ष्यामि यत्नेन गायत्र्यष्टसहस्त्रकम् ।
नाम्नां शुभानां दिव्यानां सर्वपापविनाशनम् ॥५॥
सृष्ट्यादौ यद्भगवता पूर्वे प्रोक्तं ब्रवीमि ते ।
अष्टोत्तरसहस्त्रस्य ऋषिर्ब्रह्मा प्रकीर्तितः ॥६॥
छन्दोऽनुष्टुप्तथा देवी गायत्रीं देवता स्मृता ।
हलोबीजानि तस्यैव स्वराः शक्तय ईरिताः ॥७॥
अङ्गन्यासकरन्यासावुच्येते मातृकाक्षरैः ।
अथ ध्यानं प्रवक्ष्यामि साधकानां हिताय वै ॥८॥

अचिन्त्यलक्षणाव्यक्ताप्यर्थमातृमहेश्वरी ।
अमृतार्णवमध्यस्थाप्यजिता चापराजिता ॥१॥
अणिमादिगुणाधाराप्यर्कमण्डलसंस्थिता ।
अजराजापराधर्मा अक्षसूत्रधराधरा ॥२॥
अकारादिक्षकारान्ताप्यरिषड्वर्गभेदिनी ।
अञ्जनाद्रिप्रतीकाशाप्यञ्जनाद्रिनिवासिनी ॥३॥
अदितिश्चाजपाविद्याप्यरविन्दनिभेक्षणा ।
अन्तर्बहिःस्थिताविद्याध्वंसिनी चान्तरात्मिका ॥४॥
अजा चाजमुखावासाप्यरविन्दनिभानना ।

अर्धमात्रार्थदानज्ञाप्यरिमण्डलमर्दिनी ॥५॥
असुरघ्नी ह्यमावास्याप्यलक्ष्मीघ्न्यन्त्यजार्चिता ।
आदिलक्ष्मीश्चादिशक्तिराकृतिक्तायताननना ॥६॥
आदित्यपदवीचाराप्यादित्यपरिसेविता ।
आचार्यावर्तनाचाराप्यादिमूर्तिनिवासिनी ॥७॥
आग्नेयी चामरी चाद्या चाराध्या चासनस्थिता ।
आधारनिलयाधारा चाकाशान्तनिवासिनी ॥८॥
आद्याक्षरसमायुक्ता चान्तराकाशरूपिणी ।
आदित्यमण्डलगता चान्तरध्वान्तनाशिनी ॥९॥
इन्दिरा चेष्टदा चेष्टा चेन्दीवरनिभेक्षणा ।
इरावती चेन्द्रपदा चेन्द्राणी चेन्दुरूपिणी ॥१०॥
इक्षुकोदण्डसंयुक्ता चेषुसंधानकारिणी ।
इन्द्रनीलसमाकारा चेडापिङ्गलरूपिणी ॥११॥
इन्द्राक्षीचेश्वरी देवी चेहात्रयविवर्जिता ।
उमा चोषा ह्युडुनिभा उर्वारुकलानना ॥१२॥
उडुप्रभा चोडुमती ह्युडुपा ह्युडुमध्यगा ।
ऊर्ध्व चाप्यूर्ध्वाकेशी चाप्यूर्ध्वाधोगतिभेदिनी ॥१३॥
ऊर्ध्वाबाहुप्रिया चोर्मिमालावाग्ग्रन्थदायिनी ।
ऋतं चर्षिऋतुमती ऋषिदेवनमस्कृता ॥१४॥
ऋग्वेदा ऋणहर्त्री च ऋषिमण्डलचारिणी ।
ऋद्धिदा ऋजुमार्गस्था ऋजुधर्मा ऋतुप्रदा ॥१५॥
ऋग्वेदनिलया ऋज्वी लुप्तधर्मप्रवर्तिनी ।
लूतारिवरसम्भूता लूतादिविषहारिणी ॥१६॥
एकाक्षरा चौकमात्रा चौका चौकैकनिष्ठिता ।
ऐन्द्री ह्यैरावतारूढा चौहिकामुष्मिकप्रदा ॥१७॥
ओंकारा ह्योषधी चोता चोतप्रोतनिवासिनी ।
और्वा ह्यौषधसम्पन्ना औपासनफलप्रदा ॥१८॥
अण्डमध्यस्थिता देवी चा:कारमनुरूपिणी ।
कात्यायनी कालरात्रि: कामाक्षी कामसुन्दरी ॥१९॥
कमला कामिनी कान्ता कामदा कालकण्ठिनी ।
करिकुम्भस्तनभरा करवीरसुवासिनी ॥२०॥
कल्याणी कुण्डलवती कुरुक्षेत्रनिवासिनी ।
कुरुविन्ददलाकारा कुण्डली कुमुदालया ॥२१॥

कालजिह्वा करालास्या कालिका कालरूपिणी ।
कमनीयगुणा कान्तिः कलाधारा कुमुद्वती ।।२२।।
कौशिकी कमलाकारा कामचारप्रभञ्जिनी ।
कौमारी करुणापाङ्गी ककुबन्ता करिप्रिया ।।२३।।
केसरी केशवनुता कदम्बकुसुमप्रिया ।
कालिन्दी कालिका काञ्ची कलशोद्भवसंस्तुता ।।२४।।
काममाता क्रतुमती कामरूपा कृपावती ।
कुमारी कुण्डनिलया किराती कीरवाहना ।।२५।।
कैकेयी कोकिलालापा केतकी कुसुमप्रिया ।
कमण्डलुधरा काली कर्मनिर्मूलकारिणी ।।२६।।
कलहंसगतिः कक्षा कृतकौतुकमङ्गला ।
कस्तूरीतिलका कम्प्रा करीन्द्रगमना कुहूः ।।२७।।
कर्पूरलेपना कृष्णा कपिला कुहराश्रया ।
कूटस्था कुधरा कम्रा कुक्षिस्थाखिलविष्टपा ।।२८।।
खड्गखेटकरा खर्वा खेचरी खगवाहना ।
खट्वाङ्गधारिणी ख्याता खगराजोपरिस्थिता ।।२९।।
खलघ्नी खण्डितजरा खण्डाख्यानप्रदायिनी ।
खण्डेन्दुतिलका गङ्गा गणेशगुहपूजिता ।।३०।।
गायत्री गोमती गीता गान्धारी गानलोलुपा ।
गौतमी गामिनी गाधा गन्धर्वाप्सरसेविता ।।३१।।
गोविन्दचरणाक्रान्ता गुणत्रयविभाविता ।
गन्धर्वी गह्वरी गोत्रा गिरीशा गहना गमी ।।३२।।
गुहावासा गुणवती गुरुपापप्रणाशिनी ।
गुर्वी गुणवती गुह्या गोप्तव्या गुणदायिनी ।।३३।।
गिरिजा गुह्यमातङ्गी गरुडध्वजवल्लभा ।
गर्वापहारिणी गोदा गोकुलस्था गदाधरा ।।३४।।
गोकर्णनिलयासक्ता गुह्यमण्डलवर्तिनी ।
घर्मदा घनदा घण्टा घोरदानवमर्दिनी ।।३५।।
घृणिमन्त्रमयी घोषा घनसम्पातदायिनी ।
घण्टारवप्रिया घ्राणा घृणिसंतुष्टकारिणी ।।३६।।
घनारिमण्डला घूर्णा घृताची घनवेगिनी ।
ज्ञानधातुमयी चर्चा चर्चिता चारुहासिनी ।।३७।।
चटुला चण्डिका चित्र चित्रमाल्यविभूषिता ।
चतुर्भुजा चारुदन्ता चातुरी चरितप्रदा ।।३८।।

चूलिका चित्रवस्त्रान्ता चन्द्रमःकर्णकुण्डला ।
चन्द्रहासा चारुदात्री चकोरी चन्द्रहासिनी ॥३९॥
चन्द्रिका चन्द्रधात्री च चौरी चौरा च चण्डिका ।
चञ्चद्वाग्वादिनी चन्द्रचूडा चोरविनाशिनी ॥४०॥
चारुचन्दनलिप्ताङ्गी चञ्चच्चामरवीजिता ।
चारुमध्या चारुगतिश्चन्दिला चन्द्ररूपिणी ॥४१॥
चारुहोमप्रिया चार्वाचरिता चक्रबाहुका ।
चन्द्रमण्डलमध्यस्था चन्द्रमण्डलदर्पणा ॥४२॥
चक्रवाकस्तनी चेष्टा चित्रा चारुविलासिनी ।
चित्स्वरूपा चन्द्रवती चन्द्रमाश्चन्दनप्रिया ॥४३॥
चोदयित्री चिरप्रज्ञा चातका चारुहेतुकी ।
छत्रयाता छत्रधरा छाया छन्दःपरिच्छदा ॥४४॥
छायादेवी छिद्रनखा छन्नेन्द्रियविसर्पिणी ।
छन्दोऽनुष्टुप्प्रतिष्ठान्ता छिद्रोपद्रवभेदिनी ॥४५॥
छेदा छत्रेश्वरी छिन्ना छुरिका छेदनप्रिया ।
जननी जन्मरहिता जातवेदा जगन्मयी ॥४६॥
जाह्नवी जटिला जेत्री जरामरणवर्जिता ।
जम्बूद्वीपवती ज्वाला जयन्ती जलशालिनी ॥४७॥
जितेन्द्रिया जितक्रोधा जितामित्रा जगत्प्रिया ।
जातरूपमयी जिह्वा जानकी जगती जरा ॥४८॥
जनित्री जह्नुतनया जगत्त्रयहितैषिणी ।
ज्वालामुखी जपवती ज्वरघ्नी जितविष्टपा ॥४९॥
जिताक्रान्तमयी ज्वाला जाग्रती ज्वरदेवता ।
ज्वलन्ती जलदा ज्येष्ठा ज्याघोषास्फोटदिङ्मुखी ॥५०॥
जम्भिनी जृम्भणा जृम्भा ज्वलन्माणिक्यकुण्डला ।
झिंझिका झणनिर्घोषा झंझामारुतवेगिनी ॥५१॥
झल्लरीवाद्यकुशला ञरूपा ञभुजा स्मृता ।
टङ्कबाणसमायुक्ता टङ्किनी टङ्कभेदिनी ॥५२॥
टङ्कीगणकृताघोषा टङ्कनीयमहोरसा ।
टङ्कारकारिणी देवी ठठशब्दनिनादिनी ॥५३॥
डामरी डाकिनी डिम्भा डुण्डमारैकनिर्जिता ।
डामरीतन्त्रमार्गस्था डमड्डमरुनादिनी ॥५४॥
डिण्डीरवसहा डिम्भलसत्क्रीडापरायणा ।
ढुण्ढिविघ्नेशजननी ढक्काहस्ता ढिलिव्रजा ॥५५॥

नित्यज्ञाना निरुपमा निर्गुणा नर्मदा नदी ।
त्रिगुणा त्रिपदा तन्त्री तुलसी तरुणा तरुः ।।५६।।
त्रिविक्रमपदाक्रान्ता तुरीयपदगामिनी ।
तरुणादित्यसंकाशा तामसी तुहिना तुरा ।।५७।।
त्रिकालज्ञानसम्पन्ना त्रिवली च त्रिलोचना ।
त्रिशक्तिस्त्रिपुरा तुङ्गा तुरङ्गवदना तथा ।।५८।।
तिमिङ्गिलगिला तीव्रा त्रिस्रोता तामसादिनी ।
तन्त्रमन्त्रविशेषज्ञा तनुमध्या त्रिविष्टपा ।।५९।।
त्रिसन्ध्या त्रिस्तनी तोषासंस्था तालप्रतापिनी ।
ताटङ्किनी तुषाराभा तुहिनाचलवासिनी ।।६०।।
तन्तुजालसमायुक्ता तारहारावलिप्रिया ।
तिलहोमप्रिया तीर्था तमालकुसुमाकृतिः ।।६१।।
तारका त्रियुता तन्वी त्रिशङ्कुपरिवारिता ।
तलोदरी तिलाभूषा ताटङ्कप्रियवाहिनी ।।६२।।
त्रिजटा तित्तिरी तृष्णा त्रिविधा तरुणाकृतिः ।
तप्तकाञ्चनसंकाशा तप्तकाञ्चनभूषणा ।।६३।।
त्रैयम्बका त्रिवर्गा च त्रिकालज्ञानदायिनी ।
तर्पणा तृप्तिदा तृप्ता तामसी तुम्बुरुस्तुता ।।६४।।
ताक्ष्यर्स्था त्रिगुणाकारा त्रिभङ्गी तनुवल्लरिः ।
थात्कारी थारवा थान्ता दोहिनी दीनवत्सला ।।६५।।
दानवान्तकरी दुर्गा दुर्गासुरनिबर्हिणी ।
देवरीतिर्दिवारात्रिर्द्रौपदी दुन्दुभिस्वना ।।६६।।
देवयानी दुरावासा दारिद्र्योद्भेदिनी दिवा ।
दामोदरप्रिया दीप्ता दिग्वासा दिग्विमोहिनी ।।६७।।
दण्डकारण्यनिलया दण्डिनी देवपूजिता ।
देववन्द्या दिविषदा द्वेषिणी दानवाकृतिः ।।६८।।
दीनानाथस्तुता दीक्षा दैवतादिस्वरूपिणी ।
धात्री धनुर्धरा धेनुर्धारिणी धर्मचारिणी ।।६९।।
धरन्धरा धराधारा धनदा धान्यदोहिनी ।
धर्मशीला धनाध्यक्षा धनुर्वेदविशारदा ।।७०।।
धृतिर्धन्या धृतपदा धर्मराजप्रिया ध्रुवा ।
धूमावती धूमकेशी धर्मशास्त्रप्रकाशिनी ।।७१।।
नन्दा नन्दप्रिया निद्रा नृनुता नन्दनात्मिका ।
नर्मदा नलिनी नीला नीलकण्ठसमाश्रया ।।७२।।

नारायणप्रिया नित्या निर्मला निर्गुणा निधिः ।
निराधारा निरुपमा नित्यशुद्धा निरञ्जना ।।७३।।
नादबिन्दुकलातीता नादबिन्दुकलात्मिका ।
नृसिंहिनी नगधरा नृपनागविभूषिता ।।७४।।
नरकक्लेशशमनी नारायणपदोद्भवा ।
निरवद्या निराकारा नारदप्रियकारिणी ।।७५।।
नानाज्योतिः समाख्याता निधिदा निर्मलात्मिका ।
नवसूत्रधरा नीतिर्निरुपद्रवकारिणी ।।७६।।
नन्दजा नवरत्नाढ्या नैमिषारण्यवासिनी ।
नवनीतप्रिया नारी नीलजीमूतनिस्वना ।।७७।।
निमेषिणी नदीरूपा नीलग्रीवा निशीश्वरी ।
नामावलिर्निशुम्भघ्नी नागलोकनिवासिनी ।।७८।।
नवजाम्बूनदप्रख्या नागलोकाधिदेवता ।
नूपुराक्रान्तचरणा नरचित्तप्रमोदिनी ।।७९।।
निमग्नारक्तनयना निर्घातसमनिःस्वना ।
नन्दनोद्याननिलया निर्व्यूहोपरिचारिणी ।।८०।।
पार्वती परमोदारा परब्रह्मात्मिका परा ।
पञ्चकोशविनिर्मुक्ता पञ्चपातकनाशिनी ।।८१।।
परचित्तविधानज्ञा पञ्चिका पञ्चरूपिणी ।
पूर्णिमा परमा प्रीतिः परतेजः प्रकाशिनी ।।८२।।
पुराणी पौरुषी पुण्या पुण्डरीकनिभेक्षणा ।
पातालतलनिर्मग्ना प्रीता प्रीतिविवर्धिनी ।।८३।।
पावनी पादसहिता पेशला पवनाशिनी ।
प्रजापतिः परिश्रान्ता पर्वतस्तनमण्डला ।।८४।।
पद्मप्रिया पद्मसंस्था पद्माक्षी पद्मसम्भवा ।
पद्मपत्र पद्मपदा पद्मिनी प्रियभाषिणी ।।८५।।
पशुपाशविनिर्मुक्ता पुरन्ध्री पुरवासिनी ।
पुष्कला पुरुषा पर्वा पारिजातसुमप्रिया ।।८६।।
पतिव्रता पवित्राङ्गी पुष्पहासपरायणा ।
प्रज्ञावतीसुता पौत्री पुत्रपूज्या पयस्विनी ।।८७।।
पट्टिपाशधरा पङ्क्तिः पितृलोकप्रदायिनी ।
पुराणी पुण्यशीला च प्रणतार्तिविनाशिनी ।।८८।।
प्रद्युम्नजननी पुष्टा पितामहपरिग्रहा ।
पुण्डरीकपुरावासा पुण्डरीकसमानना ।।८९।।

पृथुजङ्घा पृथुभुजा पृथुपादा पृथूदरी ।
प्रवालशोभा पिङ्गाक्षी पीतवासाः प्रचापला ॥९०॥
प्रसवा पुष्टिदा पुण्या प्रतिष्ठा प्रणवागतिः ।
पञ्चवर्णा पञ्चवाणी पञ्चिका पञ्जरस्थिता ॥९१॥
परमाया परज्योतिः परप्रीतिः परागतिः ।
पराकाष्ठा परेशानी पाविनी पावकद्युतिः ॥९२॥
पुण्यभद्रा परिच्छेद्या पुष्पहासा पृथूदरी ।
पीताङ्गी पीतवसना पीतशय्या पिशाचिनी ॥९३॥
पीतक्रिया पिशाचघ्नी पाटलाक्षी पटुक्रिया ।
पञ्चभक्षप्रियाचारा पूतनाप्राणघातिनी ॥९४॥
पुन्नागवनमध्यस्था पुण्यतीर्थनिषेविता ।
पञ्चाङ्गी च पराशक्तिः परमाह्लादकारिणी ॥९५॥
पुष्पकाण्डस्थिता पूषा पोषिताखिलविष्टपा ।
पानप्रिया पञ्चशिखा पन्नगोपरिशायिनी ॥९६॥
पञ्चमात्रात्मिका पृथ्वी पथिका पृथुदोहिनी ।
पुराणन्यायमीमांसा पाटली पुष्पगन्धिनी ॥९७॥
पुण्यप्रजा पारदात्री परमार्गैकगोचरा ।
प्रवालशोभा पूर्णाशा प्रणवा पल्लवोदरी ॥९८॥
फलिनी फलदा फल्गुः फूत्कारी फलकाकृतिः ।
फणीन्द्रभोगशयना फणिमण्डलमण्डिता ॥९९॥
बालबाला बहुमता बालातपनिभांशुका ।
बलभद्रप्रिया वन्द्या वडवा बुद्धिसंस्तुता ॥१००॥
बन्दीदेवी बिलवती बडिशघ्नी बलिप्रिया ।
बान्धवी बोधिता बुद्धिर्बन्धूककुसुमप्रिया ॥१०१॥
बालभानुप्रभाकारा ब्राह्मी ब्राह्मणदेवता ।
बृहस्पतिस्तुता वृन्दा वृन्दावनविहारिणी ॥१०२॥
बालाकिनी बिलाहारा बिलवासा बहूदका ।
बहुनेत्रा बहुपदा बहुकर्णावतंसिका ॥१०३॥
बहुबाहुयुता बीजरूपिणी बहुरूपिणी ।
बिन्दुनादकलातीता बिन्दुनादस्वरूपिणी ॥१०४॥
बद्धगोधाङ्गुलित्राणा बदर्याश्रमवासिनी ।
बृन्दारका बृहत्स्कन्धा बृहती बाणपातिनी ॥१०५॥
वृन्दाध्यक्षा बहुनुता वनिता बहुविक्रमा ।
बद्धपद्मासनासीना बिल्वपत्रतलस्थिता ॥१०६॥

बोधिद्रुमनिजावासा बडिस्था बिन्दुदर्पणा ।
बाला बाणासनवती वडवानलवेगिनी ॥१०७॥
ब्रह्माण्डबहिरन्तःस्था ब्रह्मकङ्कणसूत्रिणी ।
भवानी भीषणवती भाविनी भयहारिणी ॥१०८॥
भद्रकाली भुजङ्गाक्षी भारती भारताशया ।
भैरवी भीषणाकारा भूतिदा भूतिमालिनी ॥१०९॥
भामिनी भोगनिरता भद्रदा भूरिविक्रमा ।
भूतवासा भृगुलता भार्गवी भूसुरार्चिता ॥११०॥
भागीरथी भोगवती भवनस्था भिषग्वरा ।
भामिनी भोगिनी भाषा भवानी भूरिदक्षिणा ॥१११॥
भर्गात्मिका भीमवती भवबन्धविमोचिनी ।
भजनीया भूतधात्रीरञ्जिता भुवनेश्वरी ॥११२॥
भुजङ्गवलया भीमा भेरुण्डा भागधेयिनी ।
माता माया मधुमती मधुजिह्वा मधुप्रिया ॥११३॥
महादेवी महाभागा मालिनी मीनलोचना ।
मायातीता मधुमती मधुमांसा मधाद्रवा ॥११४॥
मानवी मधुसम्भूता मिथिलापुरवासिनी ।
मधुकैटभसंहर्त्री मेदिनी मेघमालिनी ॥११५॥
मन्दोदरी महामाया मैथिली मसृणप्रिया ।
महालक्ष्मीर्महाकाली महाकन्या महेश्वरी ॥११६॥
माहेन्द्री मेरुतनया मन्दारकुसुमार्चिता ।
मञ्जुमञ्जीरचरणा मोक्षदा मञ्जुभाषिणी ॥११७॥
मधुरद्राविणी मुद्रा मलया मलयान्विता ।
मेधा मरकतश्यामा मागधी मेनकात्मजा ॥११८॥
महामारी महावीरा महाश्यामा मनुस्तुता ।
मातृका मिहिराभासा मुकुन्दपदविक्रमा ॥११९॥
मूलाधारस्थिता मुग्धा मणिपूरकवासिनी ।
मृगाक्षी महिषारूढा महिषासुरमर्दिनी ॥१२०॥
योगासना योगगम्या योगा यौवनकाश्रया ।
यौवनी युद्धमध्यस्था यमुना युगधारिणी ॥१२१॥
यक्षिणी योगयुक्ता च यक्षराजप्रसूतिनी ।
यात्रा यानविधानज्ञा यदुवंशसमुद्भवा ॥१२२॥
यकारादिहकारान्ता याजुषी यज्ञरूपिणी ।
यामिनी योगनिरता यातुधानभयङ्करी ॥१२३॥

रुक्मिणी रमणी रामा रेवती रेणुका रतिः ।
रौद्री रौद्रप्रियाकारा राममाता रतिप्रिया ॥१२४॥
रोहिणी राज्यदा रेवा रमा राजीवलोचना ।
राकेशी रूपसम्पन्ना रत्नसिंहासनस्थिता ॥१२५॥
रक्तमाल्याम्बरधरा रक्तगन्धानुलेपना ।
राजहंससमारूढा रम्भा रक्तबलिप्रिया ॥१२६॥
रमणीययुगाधारा राजिताखिलभूतला ।
रुरुचर्मपरीधाना रथिनी रत्नमालिका ॥१२७॥
रोगेशी रोगशमनी राविणी रोमहर्षिणी ।
रामचन्द्रपदाक्रान्ता रावणच्छेदकारिणी ॥१२८॥
रत्नवस्त्रपरिच्छन्ना रथस्था रुक्मभूषणा ।
लज्जाधिदेवता लोला ललिता लिङ्गधारिणी ॥१२९॥
लक्ष्मीर्लोला लुप्तविषा लोकिनी लोकविश्रुता ।
लज्जा लम्बोदरी देवी ललना लोकधारिणी ॥१३०॥
वरदा वन्दिता विद्या वैष्णवी विमलाकृतिः ।
वाराही विरजा वर्षा वरलक्ष्मीर्विलासिनी ॥१३१॥
विनता व्योममध्यस्था वारिजासनसंस्थिता ।
वारुणी वेणुसम्भूता वीतिहोत्रा विरूपिणी ॥१३२॥
वायुमण्डलमध्यस्था विष्णुरूपा विधिप्रिया ।
विष्णुपत्नी विष्णुमती विशालाक्षी वसुन्धरा ॥१३३॥
वामदेवप्रिया वेला वज्रिणी वसुदोहिनी ।
वेदाक्षरपरीताङ्गी वाजपेयफलप्रदा ॥१३४॥
वासवी वामजननी वैकुण्ठनिलया वरा ।
व्यासप्रिया वर्मधरा वाल्मीकिपरिसेविता ॥१३५॥
शाकम्भरी शिवा शान्ता शरदा शरणागतिः ।
शातोदरी शुभाचारा शुम्भासुरविमर्दिनी ॥१३६॥
शोभावती शिवाकारा शंकरार्धशरीरिणी ।
शोणा शुभाशया शुभ्रा शिरःसन्धानकारिणी ॥१३७॥
शरावती शरानन्दा शरज्ज्योत्स्ना शुभानना ।
शरभा शूलिनी शुद्धा शबरी शुकवाहना ॥१३८॥
श्रीमती श्रीधरानन्दा श्रवणानन्ददायिनी ।
शर्वाणी शर्वरीवन्द्या षड्भाषा षड्ऋतुप्रिया ॥१३९॥
षडाधारस्थिता देवी षण्मुखप्रियकारिणी ।
षडङ्गरूपसुमतिसुरासुरनमस्कृता ॥१४०॥

सरस्वती सदाधारा सर्वमङ्गलकारिणी ।
सामगानप्रिया सूक्ष्मा सावित्री सामसम्भवा ॥१४१॥
सर्वावासा सदानन्दा सुस्तनी सागराम्बरा ।
सर्वैश्वर्यप्रिया सिद्धिः साधुबन्धुपराक्रमा ॥१४२॥
सप्तर्षिमण्डलगता सोममण्डलवासिनी ।
सर्वज्ञा सान्द्रकरुणा समानाधिकवर्जिता ॥१४३॥
सर्वोत्तुङ्गा सङ्गहीना सद्गुणा सकलेष्टदा ।
सरघा सूर्यतनया सुकेशी सोमसंहतिः ॥१४४॥
हिरण्यवर्णा हरिणी ह्रींकारी हंसवाहिनी ।
क्षौमवस्त्रपरीताङ्गी क्षीराब्धितनया क्षमा ॥१४५॥
गायत्री चौव सावित्री पार्वती च सरस्वती ।
वेदगर्भा वरारोहा श्रीगायत्री पराम्बिका ॥१४६॥
इति साहस्रकं नाम्नां गायत्राश्चैव नारद ।
पुण्यदं सर्वपापघ्नं महासम्पत्तिदायकम् ॥१४७॥
एवं नामानि गायत्र्यास्तोषोत्पत्तिकराणि हि ।
अष्टम्यां च विशेषेण पठितव्यं द्विजैः सह ॥१४८॥
जपं कृत्वाहोम पूजाध्यानं कृत्वा विशेषतः ।
यस्मै कस्मै न दातव्यं गायत्र्यास्तु विशेषतः ॥१४९॥
सुभक्ताय सुशिष्याय वक्तव्यं भूसु राय वै ।
भ्रष्टेभ्यः साधकेभ्यश्च बान्धवेभ्यो न दर्शयेत् ॥१५०॥
यद्गृहे लिखितं शास्त्रं भयं तस्य न कस्यचित् ।
चञ्चलापिस्थिरा भूत्वा कमला तत्र तिष्ठति ॥१५१॥
इदं रहस्यं परमं गुह्याद्गुह्यतरं महत् ।
पुण्यप्रदं मनुष्याणां दरिद्राणांनिधिप्रदम् ॥१५२॥
मोक्षप्रदं मुमुक्षूणां कामिनां सर्वकामदम् ।
रोगाद्वै मुच्यते रोगी बद्धो मुच्येत बन्धनात् ॥१५३॥
ब्रह्महत्या सुरापानं सुवर्णस्तेयिनो नराः ।
गुरुतल्पगतो वापि पातकान्मुच्यते सकृत् ॥१५४॥
असत्प्रतिग्रहाच्चौवाऽभक्ष्यभक्षाद्विशेषतः ।
पाखण्डानृत्यमुखेभ्यः पाठनादेव मुच्यते ॥१५५॥
इदं रहस्यममलं मयोक्तं पद्मजोद्भव ।
ब्रह्मसायुज्यदं नघ्नां सत्यं सन्त्य न संशय ॥१५६॥

॥ इति श्रीमद्देवीभागवते महापुराणे द्वादशस्कन्धो गायत्रीसहस्रनामस्तोत्रं सम्पूर्णम् ॥

## ॥ श्रीगायत्रीअष्टकम् ॥

सुकल्याणीं वाणीं सुरमुनिवरैः पूजितपदाम्
शिवामाद्यां वन्द्यां त्रिभुवनमयीं वेदजननीम् ।
परं शक्तिं स्त्रष्टुं विविधविध रूपां गुणम्यीं
भजेऽम्बां गायत्रीं परमसुभगानन्दजननीम् ॥१॥

विशुद्धां सत्त्वस्थामखिल दुरवस्थादिहरणीं
निराकारां सारां सुविमल तपो मूर्तिमतुलाम् ।
जगज्ज्येष्ठां श्रेष्ठामसुरसुरपूज्यां श्रुतिनुतां
भजेऽम्बां गायत्रीं परमसुभगानन्दजननीम् ॥२॥

तपो निष्ठाभीष्टांस्वजनमनसन्तापशमनीं
दयामूर्तिं स्फूर्तिं यतितति प्रसादैकसुलभाम् ।
वरेण्यां पुण्यां तां निखिल भव बन्धापहरणीं
भजेऽम्बां गायत्रीं परमसुभगानन्दजननीम् ॥३॥

सदाराध्यां साध्यां सुमति मति विस्तारकरणीं
विशोकामालोकां हृदयगत मोहान्धहरणीम् ।
परां दिव्यां भव्यामगमभवसिन्ध्वेक तरणीं
भजेऽम्बां गायत्रीं परमसुभगानन्दजननीम् ॥४॥

अजां द्वैतां त्रैतां विविधगुणरूपां सुविमलां
तमो हन्त्रीं-तन्त्रीं श्रुति मधुरनादां रसमयीम् ।
महामान्यां धन्यां सततकरुणाशील विभवां
भजेऽम्बां गायत्रीं परमसुभगानन्दजननीम् ॥४॥

जगद्धात्रीं पात्रीं सकल भव संहारकरणीं
सुवीरां धीरां तां सुविमल तपो राशि सरणीम् ।
अनेकामेकां वै त्रिजगसदधिष्ठानपदवीं
भजेऽम्बां गायत्रीं परमसुभगानन्दजननीम् ॥५॥

प्रबुद्धां बुद्धां तां स्वजनमति जाड्यापहरणां
हिरण्यां गुण्यां तां सुकविजन गीतां सुनिपुणीम् ।
सुविद्यां निरवद्याममल गुणगाथां भगवतीं
भजेऽम्बां गायत्रीं परमसुभगानन्दजननीम् ॥६॥

अनन्तां शान्तां यां भजति बुध वृन्दः श्रुतिमयीं
सुगेयां ध्येयां यां स्मरति हृदि नित्यं सुरपतिः ।
सदा भक्तया शक्तया प्रणतमतिभिः प्रीतिवशगां
भजेऽम्बां गायत्रीं परमसुभगानन्दजननीम् ।।७।।

शुद्ध चित्तः पठेद्यस्तु गायत्र्या अष्टकं शुभम् ।
अहो भाग्यो भवेल्लोके तस्मिन् माता प्रसीदति ।।८।।

इति गायत्रयाष्टकं अथवा स्तोत्रं सम्पूर्णम् ।

---

## श्री गायत्री अष्टोत्तर शतनामावलिः

ॐ श्री गायत्र्यै नमः।
ॐ जगन्मात्रे नमः।
ॐ परब्रह्मस्वरूपिण्यै नमः।
ॐ परमार्थप्रदायै नमः।
ॐ जप्यायै नमः।
ॐ ब्रह्मतेजोविवर्धिन्यै नमः।
ॐ ब्रह्मास्त्ररूपिण्यै नमः।
ॐ भव्यायै नमः।
ॐ त्रिकालध्येयरूपिण्यै नमः।
ॐ त्रिमूर्तिरूपायै नमः।
ॐ सर्वज्ञायै नमः।
ॐ वेदमात्रे नमः।
ॐ मनोन्मन्यै नमः।
ॐ बालिकायै नमः।
ॐ तरुण्यै नमः।
ॐ वृद्धायै नमः।
ॐ सूर्यमण्डलवासिन्यै नमः।
ॐ मन्देहदानवध्वंसकारिण्यै नमः।
ॐ सर्वकारणायै नमः।
ॐ हंसारूढायै नमः।
ॐ गरुडारूढायै नमः।
ॐ वृषभारूढायै नमः।
ॐ शुभायै नमः।
ॐ षट्कुक्षिण्यै नमः।
ॐ त्रिपदायै नमः।
ॐ शुद्धायै नमः।
ॐ पञ्चशीर्षायै नमः।
ॐ त्रिलोचनायै नमः।
ॐ त्रिवेदरूपायै नमः।
ॐ त्रिविधायै नमः।
ॐ त्रिवर्गफलदायिन्यै नमः।
ॐ दशहस्तायै नमः।
ॐ चन्द्रवर्णायै नमः।
ॐ विश्वामित्रवरप्रदायै नमः।
ॐ दशायुधधरायै नमः।
ॐ नित्यायै नमः।
ॐ सन्तुष्टायै नमः।
ॐ ब्रह्मपूजितायै नमः।
ॐ आदिशक्तयै नमः।
ॐ महाविद्यायै नमः।
ॐ सुषुम्नाख्यायै नमः।
ॐ सरस्वत्यै नमः।
ॐ चतुर्विंशत्यक्षराढ्यायै नमः।
ॐ सावित्र्यै नमः।
ॐ सत्यवत्सलायै नमः।
ॐ सन्ध्यायै नमः।

ॐ रात्र्यै नमः।

ॐ प्रभाताख्यायै नमः।

ॐ सांख्यायनकुलोद्भवायै नमः।

ॐ सर्वेश्वर्यै नमः।

ॐ सर्वविद्यायै नमः।

ॐ सर्वमन्त्राद्यै नमः।

ॐ अव्ययायै नमः।

ॐ शुद्धवस्त्रायै नमः।

ॐ शुद्धविद्यायै नमः।

ॐ शुक्लमाल्यानुलेपनायै नमः।

ॐ सुरसिन्धुसमायै नमः।

ॐ सौम्यायै नमः।

ॐ ब्रह्मलोकनिवासिन्यै नमः।

ॐ प्रणवप्रतिपाद्यार्थायै नमः।

ॐ प्रणतोद्धरणक्षमायै नमः।

ॐ जलाञ्जलिसुसन्तुष्टायै नमः।

ॐ जलगर्भायै नमः।

ॐ जलप्रियायै नमः।

ॐ स्वाहायै नमः।

ॐ स्वधायै नमः।

ॐ सुधासंस्थायै नमः।

ॐ श्रौषट्वौषट्वषट्क्रियायै नमः।

ॐ सुरभ्यै नमः।

ॐ षोडशकलायै नमः।

ॐ मुनिबृन्दनिषेवितायै नमः।

ॐ यज्ञप्रियायै नमः।

ॐ यज्ञमूर्त्यै नमः।

ॐ स्रुक्स्रुवाज्यस्वरूपिण्यै नमः।

ॐ अक्षमालाधरायै नमः।

ॐ अक्षमालासंस्थायै नमः।

ॐ अक्षराकृत्यै नमः।

ॐ मधुछन्दसे नमः।

ॐ ऋषिप्रीतायै नमः।

ॐ स्वच्छन्दायै नमः।

ॐ छन्दसांनिधये नमः।

ॐ अङ्गुलीपर्वसंस्थानायै नमः।

ॐ चतुर्विंशतिमुद्रिकायै नमः।

ॐ ब्रह्ममूर्त्यै नमः।

ॐ रुद्रशिखायै नमः।

ॐ सहस्रपरमाम्बिकायै नमः।

ॐ विष्णुहृदयायै नमः।

ॐ अग्निमुख्यै नमः।

ॐ शतमध्यायै नमः।

ॐ दशावरणायै नमः।

ॐ सहस्रदलपद्मस्थायै नमः।

ॐ हंसरूपायै नमः।

ॐ निरञ्जनायै नमः।

ॐ चराचरस्थायै नमः।

ॐ चतुरायै नमः।

ॐ सूर्यकोटिसमप्रभायै नमः।

ॐ पञ्चवर्णमुख्यै नमः।

ॐ धात्र्यै नमः।

ॐ चन्द्रकोटिशुचिस्मितायै नमः।

ॐ महामायायै नमः।

ॐ विचित्राङ्ग्यै नमः।

ॐ मायाबीजनिवासिन्यै नमः।

ॐ सर्वयन्त्रात्मिकायै नमः।

ॐ सर्वतन्त्ररूपायै नमः।

ॐ जगद्धितायै नमः।

ॐ मर्यादापालिकायै नमः।

ॐ मान्यायै नमः।

ॐ महामन्त्रफलप्रदायै नमः।

